श्रीगणेशाय नमः ॥

अथ महर्षिकात्यायनोक्तः शुक्लयजुर्वेदशाखीय-

उदकशान्तिप्रयोगः।

संयोजकः संशोधकश्च –

शास्त्री अमृतलाल त्रिकमजी आचार्य—

(जामनगरनिवासी).

अध्यापकः—श्रीमुंबादेवीसंस्कृतवैदिकपाठशाला,

झवेरी बाजार, मुंबई नं. ३

सपत्नीको यजमान उदकशान्तिकर्माधिकारार्थं हरिद्रादिमङ्गलद्रव्यैः स्नानं विधाय शुद्धे वस्त्रोपवस्त्रे धृत्वा शुभासने कुशकम्बलाद्यास्तृते पीठे प्राङ्मुख उपविश्य स्वदक्षिणभागे स्वां पत्नीञ्चोपवेश्य शिखाबन्धनं कुर्यात् ॥

ॐमानस्तोके० इति शिखां बद्ध्वा ॐपवित्रेस्थ० इति स्वदक्षिणवामकरयोरनामिकयोः कुशपवित्रधारणं कुर्यात् ॥

तत आचमनं प्राणायामं कुर्यात्। तद्यथा—ॐ केशवाय नमः स्वाहा। ॐ नारायणाय नमः स्वाहा। ॐ माधवाय नमः स्वाहा। ॐ गोविन्दाय नम इति हस्तं प्रक्षाल्य। ॐ भूः ॐ भुवः० इति मंत्रेण त्रिवारं प्राणायामं कुर्यात् ॥

ततो ब्राह्मणाः ॐ आनोभद्राः० इति शान्तिसूक्तं पठेयुः ॥ ॐ शान्तिः शान्तिः सुशान्तिर्भवतु ॥

Generated by CamScanner from intsig.com

ततो देवतानमस्काराः– 'ॐ श्रीमन्महागणाधिपतये०' इत्यारभ्य 'सर्वकार्यार्थ०' इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥

दक्षिणहस्ते जलं गृहीत्वा–ॐविष्णुर्विष्णुर्विष्णुः। श्रीमद्भगवतो० एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थम् (अप्राप्तलक्ष्मी० इत्यादि पठित्वा) [1]अमुककर्माङ्गभूतां कात्यायनोक्तां शुक्लयजुर्वेदशाखानुसारिणीम् उदकशान्तिं करिष्ये ॥

---

१ स्वस्य गोचरराशौ तत्तत्स्थानस्थितानां सूर्यादिग्रहाणां शान्त्यर्थम् । अपत्यादेः करिष्यमाणकर्मणि निर्विघ्नतासिद्धयर्थम् । महारोगादिनिवृत्त्यर्थम् । अनावृष्टिनिवृत्तिपूर्वकवृष्टिसम्पादनार्थम् । सकलागतानागतादिसर्वभयनिवृत्त्यर्थम् । सङ्कल्पे तत्तत्कर्मण ऊहः कार्यः ॥ तथा च याज्ञवल्क्यः–ब्राह्मणान् वेदसंख्याकमंत्रतन्त्रविशारदान् । आचार्यान् वाक्यज्ञानार्थान् कुर्वतां शान्तिकर्म च ॥ आदौ च कर्मणः शुद्ध्यै शान्तिं कुर्यात्तथोदकीम् । रुद्रं साङ्गं पुरस्कृत्य चेति कात्यायनोऽब्रवीत् ॥ इष्टापूर्तेषु कार्येषु महारोगापनुत्तये । कात्यायनोक्तविधिना कुर्याच्छान्तिं द्विजोत्तमाः ॥ वैदिकेनैव मंत्रेण शान्तिं कुर्यात्प्रयत्नतः ॥ तथैव 'पतिघ्नी - प्रजाघ्नी - पशुघ्नी - गृहघ्नी - यशोघ्नी - निन्दिता तनूर्जारघ्नीं तत एनां करोमि' इति कात्यायनस्मरणात् । प्रजाघ्नी मृतप्रजा वन्ध्या वा यस्यास्ति भार्या तदर्थम् । शान्तिरुक्ता ब्रह्ममन्त्रैर्ब्राह्मणैर्वेदपारगैः ॥ तस्मात्सर्वप्रयत्नेन कात्यायनविधानतः । बौद्धायनमतेनैव इति वेदविदो विदुः । तथा च यजुर्विधाने द्रष्टव्यम् । यजुर्विधानं कात्यायनसूत्रे चाध्यायः ॥ शरीरे उत्पन्नस्योत्पत्स्यमानस्य कफवातपित्तत्रिदोषान्यतमप्रकोपोद्भूतज्वरादिविनाशनार्थम् । ग्रहभूतप्रेतपिशाचाद्युपद्रवशान्तिसमृद्ध्यर्थम् । गृहशुद्ध्यर्थम् । श्रीकामः, शान्तिकामः, ग्रहपीडानिवारणकामः, विवाहादिसंस्कारकामः । अग्न्याधानादियज्ञकामः । वानप्रस्थसंन्यासकामः । महारोगाद्यनेकमहोत्पाते पर्जन्यकामः । परराष्ट्राद्युत्पन्नाशुभशमनकामो वा । प्रधानसङ्कल्पे तत्तत्कामनाया ऊहः कार्यः । केचन नूतनगृहेऽपि शान्त्यर्थं वास्तुशान्तिं विहायोदकशान्तिमप्याचरन्ति तदाचारपरमतीव मन्दम् । नूतनगृहे तु वास्तुशान्तेरेव मुख्यत्वात् । जीर्णगृहे न दोषः ॥

Generated by CamScanner from intsig.com

पुनर्जलमादाय—तत्रादौ निर्विघ्नतासिद्धये गणपतिपूजनं स्वस्तिपुण्याहवाचनं ब्राह्मणवरणार्थमर्घवन्दनं च करिष्ये । तत्रादौ दिग्रक्षणं कलशार्चनं च करिष्ये ॥ दिग्रक्षणं, कलशार्चनं गणपतिपूजनं स्वस्तिपुण्याहवाचनञ्च कृत्वा हस्ते जलं गृहीत्वा ॥ 'अनेन पुण्याहवाचनेन ब्रह्मा प्रीयताम्' इति अत्र विशेष ऊहः कार्यः ॥ ततो यजमानोऽर्घपात्रमादायोत्थाय स्वासनात्पश्चिमभागे तिष्ठेत् । ब्राह्मणाः 'पावनाः सर्व०' ॥ इति पठित्वा कश्चिद्विप्रः अर्घो अर्घो अर्घः प्रतिगृह्यताम् । 'प्रतिगृह्णामि' इति वदन् अर्घं गृह्णीयात् ॥

ब्राह्मणवरणम्—यजमानः आदौ स्वगोत्रोच्चारं कुर्यात् । अमुकगोत्रोत्पन्नम् अमुकप्रवरान्वितम् अमुकवेदशाखाध्यायिनम् अमुकशर्माणं ब्राह्मणम् अस्मिन् उदकशान्तिकर्मणि आचार्यत्वेन त्वामहं वृणे ।

तत आचार्यः "वृतोऽस्मि" इति वदेत् । वृताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं हस्ते 'एष ते अर्घ' इति दत्त्वा ॐ बृहस्पते० इति भाले तिलकं कुर्यात् । हस्ते "ॐयदाबध्नन्०" इति कङ्कणं बद्ध्वा यथाशक्ति वरणसामग्रीं दक्षिणां वा दत्त्वा प्रार्थयेत् । आचार्य त्वं यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥

ततः पूर्व-दक्षिण-पश्चिमोत्तरासु दिक्षु स्थित्वा तत्तद्वेदमन्त्राणां जपार्थं ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदां चतुर्णां ऋत्विजां वरणम् । अथवा यच्छाखीयं कर्म तच्छा-

Generated by CamScanner from intsig.com

स्त्रीयाश्चतुर अष्टौ षड् वा ब्राह्मणान्वृणुयात् । यथा— अमुकगोत्रोत्पन्नम् अमुकप्रवरान्वितम् अमुकवेदशाखाध्यायिनम् अमुकशर्माणं ब्राह्मणम् अस्मिन् उदकशान्तिकर्मणि पूर्वस्यां दिशि विहितानां वदोक्तमंत्राणां जपार्थं त्वामहं वृणे । पाद्यादि अर्घदानान्तं सर्वं दत्त्वा गन्धादिभिः सम्पूज्य वरणसामग्रीं दक्षिणां वा दद्यात् ॥

अमुकगोत्रोत्पन्नम् अमुकप्रवरान्वितम् अमुकवेदशाखाध्यायिनम् अमुकशर्माणं ब्राह्मणम् अस्मिन् उदकशान्तिकर्मणि दक्षिणदिशि विहितानां वेदोक्तमंत्राणां जपार्थं त्वामहं वृणे । इति वृत्वा पाद्यादि दत्त्वा गन्धादिभिः सम्पूज्य वरणसामग्रीं दक्षिणां वा दद्यात् ॥

अमुकगोत्रोत्पन्नम् अमुकप्रवरान्वितम् अमुकवेदशाखाध्यायिनम् अमुकशर्माणं ब्राह्मणमस्मिन् उदकशान्तिकर्मणि पश्चिमदिशि विहितानां वेदोक्तमंत्राणां जपार्थं त्वामहं वृणे । इति वृत्वा पाद्यादि दत्त्वा गन्धादिभिः सम्पूज्य वरणसामग्रीं दक्षिणां वा दद्यात् ॥

अमुकगोत्रोत्पन्नम् अमुकप्रवरान्वितम् अमुकवेदशाखाध्यायिनम् अमुकशर्माणं ब्राह्मणम् अस्मिन् उदकशान्तिकर्मणि उत्तरदिशि विहितानां वेदोक्तमंत्राणां जपार्थं त्वामहं वृणे । इति वृत्त्वा पाद्यादि दत्त्वा गन्धादिभिः सम्पूज्य वरणसामग्रीं दक्षिणां वा दद्यात् ॥

मधुपर्कार्चनम्— यजमानो वृतानां ब्राह्मणानां मधुपर्कं-

Generated by CamScanner from intsig.com

र्चनं कृत्वा वस्त्रालङ्कारादिभिः सम्पूज्य "ब्राह्मणाः सन्तु०" इत्यादिभिः प्रार्थयेत् । ततस्ते च 'यथाज्ञानेन कर्म करिष्यामः' इति वदेयुः ॥

ततस्ते चत्वारो ब्राह्मणाः प्रक्षालितस्वस्वचरणाः तत्तद्दिशि स्थित्वा आचमनं प्राणायामञ्च कृत्वा 'ॐ पवित्रे स्थः०' इति मंत्रेण कुशपवित्रं धारयेयुः ॥

सङ्कल्पः– ते च हस्ते जलं गृहीत्वा विष्णुर्विष्णुर्विष्णुः– श्रीमद्भगवतो० इत्यादि पठित्वा मम यजमानस्य सर्वारिष्टशान्तिपूर्वकं कृतसङ्कल्पकामनापरिपूर्तये अस्मिन् उदकशान्तिकर्मणि वृता वयं स्वस्वाचार्यकर्म करिष्यामः ॥ पुनर्जलमादाय तत्रादौ अस्माकं शरीरशुद्ध्यर्थं "ॐइमम्मे०" ॐइति पावमानाख्यमंत्राणां ॐसहस्र० इति पुरुषसूक्तस्य च जपं तैरेव मन्त्रैर्दहन्यासाँश्च करिष्यामः ॥ ततो जपं कृत्वा '[1]इमम्मे'० इत्यादिभिः पुरुषसूक्तेन च देहन्यासान् कुर्युः ॥

अथ दिग्रक्षणम्– ते च न्यासान्विधाय दिग्रक्षणार्थे स्वस्ववामहस्ते सर्षपानादाय तदुपरि दक्षिणहस्तमाच्छाद्य "ॐकृणुष्वपाज०" इति वैदिकान् "अपसर्पन्तु ते भूता०" इति पौराणिकाँश्च मंत्रान् पठित्वा तान् सर्वस्यां दिशि विकीर्य स्ववामपादेन भूमिं त्रिवारं ताडयित्वा नेत्रयोरुदकस्पर्शं कुर्युः ॥

---

१ ॐ इमम्मे० हृदयाय० । ॐ त्वन्नोऽअग्ने० शिरसे० । ॐ सत्त्वन्नोऽअग्ने० शिखायै० । ॐ मापोमौषधीः० कवचाय हुम् । ॐ उदुत्तमम्० नेत्रत्रयाय वौषट् । ॐ मुञ्चतुमा० अस्त्राय फट् ।

Generated by CamScanner from intsig.com

पञ्चगव्यकरणम्—स्वस्वसमीपे कांस्यादिपात्रं धृत्वा 'ॐतत्त्सवि०' इति गायत्र्या गोमूत्रम् । 'ॐ गन्धद्वाराम्' इति गोमयम् । ॐ आप्यायं० इति क्षीरम् । 'ॐदधिक्राव्णो०' इति दधि । 'ॐतेजोसि'० इति आज्यम् । 'ॐ देवस्यत्त्वा०' इति कुशोदकम् । ततः प्रणवं पठन्तो यज्ञकाष्ठेन पञ्चगव्यमालोडयेयुः ॥ ते च तदनन्तरं ॐआपोहिष्ठामयो० इत्यादिभिस्त्रिभिर्मन्त्रैः कर्मभूमिं यज्ञसम्भाराँश्च प्रोक्षयेयुः ।

अथ ब्रह्मपूजनम् ॥

अष्टहस्तं चतुर्हस्तं वा मण्डलं कुर्यात्—कर्माचार्यो मण्डपे गृहमध्ये वा ब्रह्मपात्रस्थापनार्थं गोमयेनोपलिप्तायां भूमौ अष्टहस्तं चतुर्हस्तं वा मण्डलं कृत्वा तन्मध्ये पञ्चप्रस्थपरिमिताभिः शुष्काभिरार्द्राभिर्वा सिकताभिः व्रीहीभिर्गोधूमैर्वा स्थण्डिलं[1] विरच्य तदुपरि यवान् व्रीहीन् दूर्वाः दर्भांश्च विकीर्य उल्लेखनं कुर्यात् ।

ततः स्थण्डिलस्य जलेनाभ्युक्षणं पञ्चभूसंस्काराँश्च कृत्वा गन्धोदकेनाभ्युक्ष्य पुष्पाणि निक्षिप्य तत्र-हरिद्रा-कुंकुम-गुलालादिद्रव्यैः सुशोभितं निर्माय तदुपरि अष्टदलं पद्मं रचयेत् ॥ तदुत्तरे प्रोक्षणीः संस्कृत्य[2] तेन उदकुम्भस्थेन जलेन ब्रह्मपात्रं सम्प्रोक्ष्य स्थण्डिलोपरि पञ्चदेवताःस्थापयेत् ।

---

१ अरत्निमात्रं कूर्मपृष्ठं चतुरंगुलोच्छ्रायं स्थण्डिलं कुर्यात् ॥

२ ब्रह्मपीठादुत्तरे जलपूरितोदपात्रं निधाय तत्र पवित्रं धृत्वा तज्जलमुत्पूयावेक्ष्य तस्माज्जलमादाय ब्रह्मपात्रं प्रोक्षयेत् । इति "प्रोक्षणीः संस्कृत्य" इत्यस्य चारितार्थ्यम् ॥

Generated by CamScanner from intsig.com

ब्रह्मजज्ञानम् ०

उदुत्तमम् ०

आप्यायस्व ०



नमस्ते ०

इदंविष्णु ÷ ०

त्रातारमिन्द्रम् ०



॥ इति उल्लेखनम् ॥

Generated by CamScanner from intsig.com

तद्यथा—मध्ये ॐ ब्रह्मजज्ञानम्० इति ॐ भूः० ब्रह्मणे नमः ब्रह्माणम् आवा० स्थाप० ॥ १ ॥ पूर्वे—'ॐ त्रातारमिन्द्रं०' इति ॐ भूः० इन्द्राय नमः इन्द्रम् आवा० स्थाप० २ दक्षिणस्याम्—ॐ यमायत्त्वा० इति ॐ भूः० यमाय नमः यमम् आवा० स्थाप० ॥ ३ ॥ पश्चिमस्याम्—'ॐ इममे वरु० इति ॐ भूः० वरुणाय नमः वरुणम् आवा० स्थाप० ॥ ४ ॥ उत्तरस्याम्—ॐ त्र्यम्बकं सोमव्रते० इति ॐ भूः० सोमाय नमः सोमम् आवा० स्थाप० ॥ ५ ॥ ॐ मनो जूति० इति ॐ भूः० ब्रह्मादिसोमान्ताः स्थण्डिलदेवताः सुप्रतिष्ठिता वरदा भवेयुः । ॐ भूः० ब्रह्मादिसोमान्तेभ्यः पञ्च देवेभ्यः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

आदौ कलशं धूपयेत्—स्थण्डिलमध्ये कलशस्थापनार्थं सुवर्ण-रजत-ताम्रमयं मृत्तिकामयं वा घटमानीय ॐ उदेनमुत्तरान्नयाग्ने घृतेनाहुत। रायस्पोषेण समिषा मदेम प्रजया च बहुकृधि ॥ ५/७ ॥ इति मंत्रेण कलशस्यान्तो गुग्गुलादिकेन धूपद्रव्येण धूपयेत्। ततः कलशस्य मुखं वस्त्रेणाच्छाद्य क्षणमात्रं कलशस्य मुखं बध्नीयात् ॥

कलशस्थापनम्—ततो वस्त्रं निष्कास्य कलशस्थापनार्थं ॐ महीद्यौः० इत्यादिभिर्मन्त्रैः कलशं संस्थापयेत्तत्र च "ॐ ब्रह्मजज्ञानम्०" इति मंत्रेण च जलं प्रपूर्य पूर्णपात्रान्तं कृत्वा वरुणमावाह्य तं संपूज्य कलशं स्थण्डिले संस्थाप्य तीर्थान्यावाहयेत् ॥

Generated by CamScanner from intsig.com

कलशे तीर्थावाहनम्–"गंगे च यमुने चैव०" इत्यादि पठित्वा अस्मिन्कलशे गंगादिनदी आवाहयिष्ये इत्यावाह्य पुनः "ॐआपोऽअस्मान्०" इति भूर्भु० समुद्रादितीर्थेभ्यो नमः तीर्थानि आवा० स्थाप० ॥ सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि इति कलशजलं पूजयेत् ॥

कलशस्य चतुर्दिक्षु दर्भाणामास्तरणम्–पूर्वस्याम्–ॐदेवस्त्वा० इति षोडश १६ दर्भान् स्थापयेत् । दक्षिणस्याम्–ॐ भूर्भुव÷स्व÷सुप्रजाः ॥ ३/३७ ॥ इति सप्त ७ दर्भान्स्थापयेत् ॥ पश्चिमस्याम्– ॐ उद्वयन्तमसस्परि० ॥ ३/१९ ॥ इति अष्टादश १८ दर्भान्स्थापयेत् ॥ उत्तरस्याम्–ॐअग्नऽआयाहि० इति सप्त ७ दर्भान् स्थापयेत् ॥

ततः कलशमध्ये सौवर्णीं ब्रह्ममूर्तिं स्थापनार्थं ब्रह्मणः सुवर्णमूर्तेर्वह्न्युत्तारणं कुर्यात् ॥

अग्न्युत्तारणम्–पात्रे सुवर्णनिर्मितां ब्रह्ममूर्तिं दर्भनिर्मितां निधाय सङ्कल्पं कुर्यात् ॥ अद्येत्यादि० शुभपुण्यतिथौ अस्याः सुवर्णब्रह्ममूर्तेः कुशनिर्मिताया ब्रह्ममूर्तेश्च निर्माणविधौ ताडनावघातादिदोषपरिहारार्थं देवतासान्निध्यार्थं घृताभ्यञ्जनपूर्वकं प्राणप्रतिष्ठां करिष्ये ॥ मूर्तिं घृतेनाभ्युज्य तदुपरि जलधारां पातयेत् ॥ तत्र मंत्राः–ॐ समुद्रस्युत्त्वा० इत्यादि "अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः । अनलोत्तारणार्थाय मूर्तीनां शुद्धिहेतवे" इत्यादि च पठित्वा

Generated by CamScanner from intsig.com

प्राणप्रतिष्ठां कुर्यात् ॥ अस्या ब्रह्ममूर्तेः प्राणा इह प्राणाः० इत्यादि पठित्वा । ॐ मनोजू० इति अस्यां मूर्तौ ब्रह्मन् सुप्रतिष्ठितो वरदो भव ॥ रक्ताम्भोधिस्थ० इति प्रार्थयेत् ॥

षोडशोपचारैः पूजनम्–ततस्तस्य यजमानः स्थण्डिलस्य परितः स्थिता आचार्याश्च षोडशोपचारैः पूजनं कुर्युः ॥

ध्यानम्–ब्रह्मंजज्ञानम्० ॐ सहस्र० ॐ भू० ब्रह्मणे० ब्रह्माणं ध्यायामि । आसनम्–पुरुषऽएवे० ॐ भू० ब्रह्मणे नमः आसनार्थे अक्षतान् स० ॥ पाद्यम्–ॐएतावा० ॐ भू० ब्रह्मणे० पादयोः पाद्यं स० ॥ अर्घम्–ॐत्रिपादूर्ध्व० इति ॐ भू० ब्रह्मणे० हस्तयोरर्घं सम० । आचमनीयम्–ॐ ततोविराड० ॐ भू० ब्रह्मणे० आचमनीयं सम० ॥

अथ पञ्चामृतस्नानम्–पयःस्नानम्–ॐपयःपृथिव्याम्० ॐभू० ब्रह्मणे पयःस्नानं सम० । पयःस्नानान्ते शुद्धो० स० । शुद्धोद० आच० सम० । दधिस्नानम्–ॐ दधिक्राव्णो० ॐ भू० ब्रह्मणे० दधिस्नानं सम० । दधिस्नानान्ते शुद्धोदक० स० । शुद्धोदक० आच० स० ॥ घृतस्नानम्–ॐ घृतम्मिमिक्षे० ॐ भू० ब्रह्मणे० घृतस्नानं स० । घृतस्ना० शुद्धो० स० । शुद्धोदक० आच० सम० ॥ मधुस्नानम्–ॐ मधुवाता० ॥ ३/३ ॥ ॐ भू० ब्रह्मणे० मधुस्नानं स० । मधुस्नानान्ते शुद्धोदक० स० । शुद्धोदक० स्नाना० आच०स०। शर्करास्नानम्–ॐ अपाऽरस० ॥ ६/२ ॥ ॐ भू० ब्रह्मणे०

---

१ वेदपुरुषाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् ॥

Generated by CamScanner from intsig.com

शर्करास्नानं स० । शर्करास्नाना० शुद्धोद० स० । शुद्धोद० आच० स० ॥ गन्धोदकस्नानम्—ॐ गन्धर्वस्त्वा० ॐ भू० ब्रह्मणे० गन्धोदक० स० । गन्धोदकस्नाना० शुद्धोद० स० । शुद्धोद० आचम० स० ॥ उद्वर्तनस्नानम्—ॐ सिञ्चन्ति० ॐ भू० ब्रह्मणे० उद्वर्तनस्नानं स० । उद्वर्त० शुद्धोद० स० । शुद्धोदक० आच० स० ॥ देवं गन्धाक्षतपुष्पैः सम्पूज्य निर्माल्यं विसृज्याभिषेकं कुर्यात् ॥

शुद्धोदकस्नानम्—स्नानम्—ॐ तस्माद्यज्ञात्सर्वहुतः[1] ॐ भू० ब्रह्मणे० शुद्धो० स० । शुद्धोदकस्नाना० आच० स० ॥ वस्त्रम्—ॐ तस्माद्यज्ञात्सर्व० ॐ भू० ब्रह्मणे० वस्त्रोपवस्त्रे सम० । वस्त्रोप० आचमनीयं स० । यज्ञोपवीतम्—ॐ तस्मादश्वा० ॐ भू० ब्रह्मणे० यज्ञोपवीतं सम० । यज्ञोप० आचम० स० ॥ गन्धम्—ॐ तँयज्ञम्० ॐ भू० ब्रह्मणे० गन्धं सम० । अक्षतान्—ॐ अक्षन्नमी० ॐ भू० ब्रह्मणे अक्षतान्स० । पुष्पाणि—ॐ यत्पुरुषम्० ॐ भू० ब्रह्मणे० पुष्पाणि स० । सौभाग्यद्रव्याणि—ॐ अहिरिव० ॐ भू० ब्रह्मणे० सौभाग्यद्रव्याणि समर्पयामि । धूपम्—ॐ ब्राह्मणो० ॐ भू० ब्रह्मणे० धूपमाघ्रापयामि । दीपम्—ॐ चन्द्रमा० ॐ भू० ब्रह्मणे० दीपं दर्श० ॥ नैवेद्यम्—ॐ नाभ्या० ॐ भू० ब्रह्मणे० नैवेद्यं सम० । नैवद्यं जलेन सम्प्रोक्ष्य ।

---

१ ब्रह्मसूक्तेन पुरुषसूक्तेन वा ।

Generated by CamScanner from intsig.com

शर्करास्नानं स० । शर्करास्नाना० शुद्धोद० स० । शुद्धोद० आच० स० ॥ गन्धोदकस्नानम्—ॐ गन्धर्वस्त्वा० ॐ भू० ब्रह्मणे० गन्धोदक० स० । गन्धोदकस्नाना० शुद्धोद० स० । शुद्धोद० आचम० स० ॥ उद्वर्तनस्नानम्—ॐ सिञ्चन्ति० ॐ भू० ब्रह्मणे० उद्वर्तनस्नानं स० । उद्वर्त० शुद्धोद० स० । शुद्धोदक० आच० स० ॥ देवं गन्धाक्षतपुष्पैः सम्पूज्य निर्माल्यं विसृज्याभिषेकं कुर्यात् ॥

शुद्धोदकस्नानम्—स्नानम्—ॐ तस्माद्यज्ञात्सर्वहुतः[1] ॐ भू० ब्रह्मणे० शुद्धो० स० । शुद्धोदकस्नाना० आच० स० ॥ वस्त्रम्—ॐ तस्माद्यज्ञात्सर्व० ॐ भू० ब्रह्मणे० वस्त्रोपवस्त्रे सम० । वस्त्रोप० आचमनीयं स० । यज्ञोपवीतम्—ॐ तस्मादश्वा० ॐ भू० ब्रह्मणे० यज्ञोपवीतं सम० । यज्ञोप० आचम० स० ॥ गन्धम्—ॐ तँयज्ञम्० ॐ भू० ब्रह्मणे० गन्धं सम० । अक्षतान्—ॐ अक्षन्नमी० ॐ भू० ब्रह्मणे अक्षतान्स० । पुष्पाणि—ॐ यत्पुरुषम्० ॐ भू० ब्रह्मणे० पुष्पाणि स० । सौभाग्यद्रव्याणि—ॐ अहिरिव० ॐ भू० ब्रह्मणे० सौभाग्यद्रव्याणि समर्पयामि । धूपम्—ॐ ब्राह्मणो० ॐ भू० ब्रह्मणे० धूपमाघ्रापयामि । दीपम्—ॐ चन्द्रमा० ॐ भू० ब्रह्मणे० दीपं दर्श० ॥ नैवेद्यम्—ॐ नाभ्या० ॐ भू० ब्रह्मणे० नैवेद्यं सम० । नैवद्यं जलेन सम्प्रोक्ष्य ।

---

१ ब्रह्मसूक्तेन पुरुषसूक्तेन वा ।

Generated by CamScanner from intsig.com

धेन्वाऽमृतीकृत्य पञ्च ग्रासमुद्राः प्रदर्शयेत्– ॐ प्राणाय० इत्यादि ॥ उत्तरापोशनम् । हस्तप्र० । मुखप्र० । करोद्वर्तनार्थे गन्धं स० । मुखवासार्थे पूगीफलं दक्षिणां च–ॐ वस्पुरुषेण० ॐ भू० ब्रह्मणे० मुखवासार्थे पूगीफलं समर्पयामि । प्रदक्षिणाम्–ॐ सप्तास्या० ॐ भू० ब्रह्मणे० प्रदक्षिणां स० ॥

आरार्त्रिक्यम्– ॐ अग्निर्देवता० ॐ भू० ब्रह्मणे नमः आरार्तिक्यं सम० । जलेन प्रदक्षिणावर्तनम् । आचाराद्देव० हस्तेन आत्मवन्दनम् । मन्त्रपुष्पाञ्जलिम्– ॐ यज्ञेन० आ-ब्रह्मब्राह्म० ॥ ३३ ॥ ॐ भू० ब्रह्मणे० मन्त्रपुष्पाञ्जलिं सम० । विशेषार्घः– ॐ ब्रह्मजज्ञानम्० ॐ भू० ब्रह्मणे० विशेषार्घं सम० । प्रार्थयेत्– ब्रह्माणिमेमतयः ॥ ३३/७८ ॥ ॐ भू० ब्रह्मणे नमः प्राथर्नापूर्वकनमस्कारान्सम० ॥ हस्ते जलं गृहीत्वा– अनेन यथाशक्ति षोडशोपचारद्रव्यैः पूजनाख्येन कर्मणा ॐ भू० ब्रह्मा प्रीयतां न मम ॥ इति ब्रह्मपूजनम् ॥

अथ तत्तन्मन्त्राणां जपः ॥

ततस्तत्तद्दिशि वृताश्चत्वार आचार्या उत्थाय ब्रह्मणः प्रदक्षिणां कुर्युः ॥ तत्र मन्त्रौ । ॐ ब्रह्मणेब्राह्मणम्० नृत्तायसूतम्० इति द्वाभ्यां मन्त्राभ्यां प्रदक्षिणां कुर्युः ॥

ततश्चत्वार आचार्या ब्रह्मणोऽभिमुखाः स्वस्वदिशि उपविश्य यजमानस्याभीष्टं चिन्तयन्तो दर्भैर्ब्रह्माणमन्वा-रब्धाः सूक्तानि जपेयुः ॥

Generated by CamScanner from intsig.com

अथ मन्त्राणां क्रमः- सव्याहृतीं त्रिपदां ॐ भूर्भुवः॑ तत्स॑वितु० । ॐइषो॑त्वो॒र्ज्जेत्वा० ॥ ¼ ॥ ॐ अ॒ग्निमी॑डे० ॐ अग्न॒ऽआया॑ हि० ॥ ॥ ॐ शन्नो॑दे॒वी॑ ॥ ½ ॥ ॐ ग॒णाना॑न्त्वा० ॥ ½ ॥ ॐ॒ यज्जा॒ग्रत॑० इति षट् ॥ ½ ॥ ॐ स॒हस्र॑० इति षोडश ॥ ½ ॥ ॐ अ॒द्भ्यः॑ ० इति षट् ॥ ½ ॥ ॐ आशु॑॰शि॑शो॒न॑० इति १७ ॥ ¾ ॥ ॐ॒ वि॒भ्राट्० इति सप्तदश १७ ॥ ¾ ॥ ॐ नम॑स्ते० इति षट्षष्ठी ६६ ॥ ½ ॥ ॐ व॒यꣳसो॑म० इति ८ ॥ ½ ॥

(कृ॒णु॒ष्व॒पा॒ज॒र्॑० इत्यारभ्य प्रमृ॒णीहि॒श॒त्रू॒न्० इत्यन्तं त्रयोदशाध्यायस्य ९-१०-११-१२-१३ पञ्च मन्त्राः॥)

कृ॒णु॒ष्व॒पा॑ज॒र्॑ ॥ कृ॒णु॒ष्व॒पा॒ज॒र्॑॰प्रा॒सि॑ति॒न्न॒पृ॒त्व्वी॑ꣳ॒ याहि राजे॒वाम॑वाँ२॥ऽइ॑भेन ॥ तृ॒ष्वी॒मनु॒प्रा॒सि॑ति॒न्द्र॒णा॒नो॒स्त्ता॒सि॒ वि॒द्ध्य॒र॒क्ष॒स॒स्त॒पि॑ष्ठै॑ ॥ ९ ॥ तव॑भ्र॒मास॑॰ ॥ तव॑भ्र॒मास॑ऽआशुया पत॒न्त्य॒नु॒स्पृ॒श॒ धृ॒ष॒ता॒शो॒शु॒चा॒न॒ः ॥ तपू॑ष्यग्नेजु॒ह्वा॒प॒त॒ङ्गान॑सन्दितो॒वि॒सृ॒ज॒वि॒ष्व॑गु॒ल्का॒ः ॥ १० ॥ प्रति॒स्प॒श॑॰ ॥ प्रति॒स्प॒श॒ो॒वि॒सृ॒ज॒ तू॒र्ण्णि॒त॒मो॒भवा॑पा॒युर्वि॒शो॑ऽअ॒स्याऽअद॑ब्धः॑ ॥ योनो॑दू॒रेऽअ॒घश॑ꣳसो॒योऽअन्त्यग्ने॒मा॑किष्टे॒ऽव्यथि॒रादधर्षीत् ॥ ११ ॥ उद॑ग्ने । तिष्ठ॒प्रत्या॑त॒नु॒ष्व॒न्यु॒मित्रा॑ँ २ ॥ ऽओष॒ता॒त्ति॒ग्ग्म॒हे॒ ते ॥ यो॒नो॒ऽअरा॑ति॒ꣳसमि॑धान॒च॒क्रे॒नी॒चा॒त॒न्ध॒क॒क्ष्य॒त॒सन्न शुष्कम् ॥ १२ ॥ ऊ॒र्द्धो॒भ॒व ॥ ऊ॒र्द्धो॒भ॒व॒प्र॒ति॒वि॒ध्या॒द्ध्य॒स्म॒दा॒वि॒ष्कृ॒णु॒ष्व॒-

Generated by CamScanner from intsig.com

दैव्यान्यग्ने ॥ अवस्थिरातनुहियातुजूनाञ्जामिमजामिम्प्र-
मृणीहिशत्रून् ॥ अग्नेष्टूवातेजसासादयामि ॥ १३ ॥

ॐ विनऽइन्द्रमृधो० इति (अष्टमाध्यायस्यैको ४४ मन्त्रः) ॥ विनः ॥ विनऽइन्द्रमृधोजहिनीचायच्छ-
पृतन्यतः ॥ योऽअस्माँ२॥ऽअभिदासत्त्यधरङ्गमयात-
मः ॥ उपयामगृहीतोसीन्द्रायत्वाविमृधऽएषतेयोनि-
रिन्द्रायत्वाविमृधे ॥ ४४ ॥

ॐ मृगोनभीमः० (अष्टादशाध्यायस्यैको ७१ मन्त्रः) ॥
मृगोन । भीमःकुचरोगिरिष्ठाःपरावतऽआजगन्थापर-
स्याः ॥ सृकꣳसꣳशायपविमिन्द्रतिग्मंविशत्रून्ताढिविमृ-
धोनुदस्व ॥ ७१ ॥ (ॐ आनोभद्रा० जनित्त्वम् इति पञ्चविंशत्यध्यायस्य १४ चतुर्दश मंत्राः) ॥ आनः ॥
आनोभद्राः क्रतवोयन्तुविश्वतोदब्धासोऽअपरीतासऽ-
उद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोर-
क्षितारोदिवेदिवे ॥ १४ ॥ देवानाम्भद्राः ॥ देवानां-
म्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम् ॥
देवानाꣳसख्यमुपसेदिमावयन्देवानऽआयुःप्रतिरन्तु
जीवसे ॥ १५ ॥ तान्पूर्वया । निविदाहूमहेवयम्भगम्मित्रम-
दितिन्दक्षमस्रिधम् ॥ अर्य्यमणंवरुणꣳसोममश्विनासर-
स्वतीनःसुभगामयस्करत् ॥ १६ ॥ तन्नः ॥ तन्नोवातो

Generated by CamScanner from intsig.com

मयोभुवांतुभेषजन्तन्मातापृथिवीतत्पिताद्यौः ॥ तद्द्रावा-
णःसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥
॥ १७ ॥ तमीशानञ्जगतस्तत्थुपस्पतिन्धियञ्जिन्वमवसे
हूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुर-
दब्धःस्वस्तयै ॥१८॥ स्वस्तिनऽइन्द्रोवृद्धश्रव-
वाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरि-
ष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ १९ ॥ पृषदश्वा
मरुतः॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथे-
षुजग्ग्मयः॥ अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाऽ
अवसागमन्निह॥२०॥ भद्रङ्कर्णेभिः । शृणुयामदेवाभद्रम्प-
श्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशे
महिदेवहितँयदायुः ॥ २१ ॥ शतमित् ॥ शतमिन्नुशु-
रदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रासोयत्र
पितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः ॥२२॥ अदि-
तिर्द्यौः ॥ अदितिर्द्यौरादितिरन्तरिक्षमदितिर्म्मातासपि-
तासपुत्रः ॥ विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्जात-
मदितिर्जनित्वम् ॥ २३ ॥

(ॐ सजोषाऽइन्द्र० इति सप्तमाध्यायस्यैको ३७
मन्त्रः) ॥ सजोषाऽइन्द्र ॥ सजोषाऽइन्द्रसगणोमरुद्-
भिःसोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ १ ॥ रणधृषो

Generated by CamScanner from intsig.com

नुदस्वाथाभयङ्कृणुहिविश्वतोनः ॥ उपयामगृहीतोसीन्द्रा-
यत्त्वामरुत्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्वते ॥ ३७ ॥
(ॐ विश्वकर्म्मा० सप्तदशाध्यायस्यैको २६ मंत्रः) ॥
विश्वकर्म्माविमनाः॥ विश्वकर्म्माविमनाऽआद्विहायाधा-
ताविधातापरमोतसन्दृक् ॥ तेषामिष्टानिसमिषामदन्ति
यत्रासप्तऽऋषीन्परऽएकमाहुः ॥ २६ ॥
(ॐऋताषाड्० इति अष्टादशाध्यायस्य ६ मन्त्राः) ॥
ॐ ऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदो
नाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यः
स्वाहा ॥ ३८ ॥
सꣳहितोविश्वसामा ॥ सꣳहितोविश्वसामासूर्य्योगन्धर्व-
स्तस्यमरीचयोप्सरसऽआयुवोनाम ॥ सनऽइदम्ब्रह्मक्षत्र-
म्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ॥ ३९ ॥ सुषुम्णः
सूर्य्यरश्मिः । सुषुम्णःसूर्य्यरश्मिश्चन्द्रमागन्धर्वस्तस्य
नक्षत्राण्यप्सरसोभेकुर्योनाम । सनऽइदम्ब्रह्मक्षत्रम्पा-
तुतस्मैस्वाहावाट्ताभ्यःस्वाहा ॥ ४० ॥ इषिरोविश्व-
व्यचाः ॥ इषिरोविश्वव्यचावातोगन्धर्वस्तस्यापोऽअप्स-
रसऽऊर्जोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावा-
ट्ताभ्यःस्वाहा ॥ ४१ ॥ भुज्युःसुपर्णः ॥ भुज्युःसुप-
र्णोयज्ञोगन्धर्वस्तस्यदक्षिणाऽअप्सरसस्तावानाम ॥ स

Generated by CamScanner from intsig.com

नऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट्ताभ्यःस्वाहा॥४२॥ प्रजापतिर्व्विश्वकर्म्मा ॥ प्रजापतिर्व्विश्वकर्म्मामनोगन्धर्व्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट्ताभ्यःस्वाहा ॥ ४३ ॥

ॐनमोस्तुसर्प्पे० इति (त्रयोदशाध्यायस्य ३ मन्त्राः) नमोस्तु । सर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः÷सर्प्पेभ्योनमः÷ ॥ ६ ॥ याऽइषवः ॥ याऽइषवो यातुधानानाँय्येवाव्वनस्पर्त्ताँ१ ॥ रनु ॥ येवावटेपुशेरतेतेभ्यः÷सर्प्पेभ्योनमः÷॥७॥ येवा ॥ येवामीरोचनेदिवोयेवा सूर्य्यस्यरश्मिषु ॥ येषामप्सुसदस्कृतन्तेभ्यः÷सर्प्पेभ्यो नमः÷ ॥ ८ ॥

ॐ अयम्पुरो हरिकेशः० (पञ्चदशाध्यायस्य १५ मन्त्राः) ॥ अयम्पुर२ ॥ अयम्पुरोहरिकेशःसूर्य्यरश्मिस्तस्यरथगृत्स्त्रश्चरथौजाश्चसेनानीग्रामण्यौ ॥ पुञ्जिकस्थलाचक्रतुस्थलाचाप्सरसौदृङ्क्षणवः÷ पशवोहेतिः२ पौरुषेयोव्वध२प्रहेतिस्तेभ्योनमोऽअस्त्वृतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमैषाञ्जम्भेदद्ध्मः ॥ १५ ॥ अयन्दक्षिणा । विश्वकर्म्मातस्यरथस्वनश्चरथेचित्रश्चसेनानीग्रामण्यौ।मेनकाचसहजन्याचाप्सरसौयातुधानाहेतीरक्षाः७ सिप्रहेतिस्तेभ्योऽनमोऽअस्त्वृतेनोवन्तुतेनोमृडयन्तुतेय-

Generated by CamScanner from intsig.com

न्द्विष्मोयञ्ञोद्वेष्टितमेपाञ्जम्भेदद्ध्मः ॥ १६ ॥ अयम्पञ्चा० अयम्पञ्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेनानी ग्रामण्यौ ॥ प्रम्लोचन्तीचानुम्लोचन्तीचाप्सरसौव्या-घ्राहेतिःसर्प्पाःप्रहैतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनो मृडयन्तुतेयन्द्विष्मोयञ्ञोद्वेष्टितमेपाञ्जम्भेदद्ध्मः ॥ १७ ॥ अयमुत्तरात् ॥ अयमुत्तरात्सँव्यद्वसुरस्तस्यताक्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्यौ ॥ विश्वाचीचघृताचीचाप्सरासावापोहेतिर्वातःप्रहैतिस्तेभ्योनमोऽअस्तुतेनोवन्तु तेनोमृडयन्तुतेयन्द्विष्मोयञ्ञोद्वेष्टितमेपाञ्जम्भेदद्ध्मः ॥ १८ ॥ अयमुपर्य्युर्वागग्वसुरस्तस्यसेनजिच्चसुषेणश्चसेनानी ग्रामण्यौ ॥ उर्वशीचपूर्वचित्तिश्चाप्सरसावव्यस्फूर्ज्जन्हेति र्विद्युत्प्रहैतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते यन्द्विष्मोयञ्ञोद्वेष्टितमेपाञ्जम्भेदद्ध्मः ॥ १९ ॥ अग्नि-र्म्मूर्द्धा । दिवःककुत्पतिःपृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ २० ॥ अयमग्निः । सहस्रिणोवाजस्यशुतिनस्पतिः ॥ मूर्द्धाकवीरयीणाम् ॥ २१ ॥ त्वामग्ने ॥ त्वामग्नेपुष्करादध्यथर्व्वानिरमन्थत ॥ मूर्ध्नोविश्वस्यवाघतः ॥ २२ ॥ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरज-सश्चनेतायत्रानियुद्भिश्चसचसेशिवाभिः ॥ दिविमूर्द्धानन्दधिषेसुवर्णाजिह्वामग्नेचकृषेहव्यवाहम् ॥ ३३ ॥ अवो-

Generated by CamScanner from intsig.com

द्यग्निꣳ । समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ यह्वाऽइवप्रवयामुज्जिहानाꣳप्रभानवः सिस्रतेनाकमच्छ । ॥ २४ ॥ अवोचामकवयेमेध्यायवचो वन्दारुवृषभायवृष्णे ॥ गविष्ठिरोनमसास्तोममग्नौदिवी वरुक्ममुरुव्यꣳसमश्रेत् ॥ २५ ॥ अयमिह । प्रथमोधायि धातृभिर्होतायजिष्ठोऽअद्भुरेष्वीड्यः ॥ यमप्नवानोभृगवो विरुरुचुर्वनेषुचित्रंविभ्वविशेविशे ॥२६॥ जनस्यगोपाः ॥ जनस्यगोपाऽअजनिष्टजागृविरग्निꣳसुदक्षꣳसुवितायनव्यसे । घृतप्रतीकोबृहतादिविस्पृशाद्युमद्विभातिभरतेभ्यꣳशुचिः ॥ २७ ॥ त्वामग्ने ॥ त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रियाणंवनेवने ॥ सजायसेमथ्यमानꣳसहोमहत्त्वामाहुꣳसहसस्पुत्रमङ्गिरꣳ ॥ २८ ॥ सखायꣳसम् ॥ सखायꣳसँवः सम्यञ्चमिषꣳस्तोमञ्चाग्नये ॥ वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसहस्वते ॥ २९ ॥ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेविश्वान्यूर्यऽआ ॥ इडस्पदेसमिध्यसेसनोवसून्याभर ॥ ३० ॥

ॐ धातारातिꣳ० (अष्टमाध्यायस्यैकः १७ मंत्रः) ॥ धातारातिः । सवितेदꣳसुषताम्प्रजापतिर्निधिपादेवोऽअग्निः ॥ त्वष्टाविष्णुंः प्रजयासꣳरराणायजमानायद्रविणन्दधातुस्वाहा ॥ १७ ॥

Generated by CamScanner from intsig.com

ॐ आयुष्यं वर्च्चः० (चतुस्त्रिंशदध्यायस्य ५०–५१–५२ त्रयो मंत्राः) आयुष्यं वर्च्चस्यम् ॥ आयुष्यं वर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यं वर्च्चस्वं त्रायाविशतादुमाम् ॥ ५० ॥ नतत् ॥ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतत् ॥ योबिभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुꣳसमनुष्येषुकृणुतेदीर्घमायुः ॥ ५१ ॥ यदाबध्नन् ॥ यदाबध्नन्दाक्षायणा हिरण्यꣳशतानीका यसुमनस्यमानाꣳ ॥ तन्मऽआबध्नामि शतशारदायायुष्मान्जरदष्टिर्यथासम् ॥ ५२ ॥

ॐ अनुनोद्यानुमति० (चतुस्त्रिंशदध्यायस्यैकोऽमन्त्रः)॥ अनुनꣳ ॥ अनुनोद्यानुमतिर्य्यज्ञन्देवेषुमन्यताम् ॥ अग्निश्चहव्यवाहनोभवतन्दाशुषेमयः ॥ ९ ॥

ॐ वैश्वानरोनऽऊतये० (अष्टादशाध्यायस्यैको ७२ मन्त्रः) ॥ वैश्वानरोनः ॥ वैश्वानरोनऽऊतयऽआप्रयातु परावतः ॥ अग्निर्न्नः सुष्टुतीरुप ॥ ७२ ॥

ॐ पृष्ट्योदिवि० (अष्टादशाध्यायस्यैको ७३ मन्त्रः) ॥ पृष्ट्योदिवि । पृष्ट्योऽअग्निः पृथिव्याम्पृष्ट्योविश्वाऽओषधीराविवेश ॥ वैश्वानरः सहसापृष्ट्योऽअग्निः सनोदिवासरिषस्पातुनक्तम् ॥ ७३ ॥

ॐ सोमोधेनुम्० (चतुस्त्रिंशदध्यायस्यैको २१ मन्त्रः)

Generated by CamScanner from intsig.com

सोमौधेनुम् ॥ सोमौधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोवीर-
ङ्कर्म्मण्यन्ददाति ॥ सादन्यंविदुत्थ्यꣳसभेयम्पितृश्रवणं
रयोददाशदस्मै ॥ २१ ॥

ॐ प्रातरग्निम्० (चतुस्त्रिंशदशाध्यायस्य ७मन्त्राः) ॥
प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्रातर्म्मित्रा-
वरुणाप्रातरश्विना ॥ प्रातर्भगम्पूषणम्ब्रह्मणस्पतिम्प्रा-
तꣳसोममुतरुद्रꣳहुवेम ॥ ३४ ॥ प्रातर्जितम्भगम् ॥ प्रात-
र्जितम्भगमुग्रꣳहुवेमवयम्पुत्रमदितेर्योविधर्त्ता ॥ आद्र-
श्चिद्यम्मन्यमानस्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह । ३५ ।
भगप्रणेतꣳ ॥ भगप्रणेतर्भगसत्यराधोभगेमान्धियमुद-
वाददन्नꣳ ॥ भगप्रनोजनयगोभिरश्वैर्भगप्रनृभिर्नृवन्तः-
स्याम ॥ ३६ ॥ उतेदानीम् ॥ उतेदानीम्भगवन्तꣳस्यामोत
प्रपित्वऽउतमध्येऽअह्नाम् ॥ उतोदितामघवन्त्सूर्य्यस्य
वयन्देवानाꣳसुमतौस्याम ॥ ३७ ॥ भगऽएव । भगवाँ२ ॥
ऽअस्त्वदेवास्तेनवयम्भगवन्तꣳस्याम ॥ तन्त्वाभगसर्वऽइज्जो
हवीतिसनोभगपुरऽएताभवेह ॥ ३८ ॥ समध्वरायं ॥ सम-
ध्वरायोषसोनमन्तदधिक्रावेवशुचयेपदाय ॥ अर्वाचीनंवसु
विदुम्भगन्नोरथमिवाश्वावाजिनऽआवहन्तु ॥ ३९ ॥ अश्वा-
वतीर्गोमतीꣳ ॥ अश्वावतीर्गोमतीर्न्नऽउषासोवीरवतीꣳ
सदमुच्छन्तुभद्राः ॥ घृतन्दुहानाविश्वतꣳप्रपीतायूयंपात
स्वस्तिभिꣳसदानꣳ ॥ ४० ॥

Generated by CamScanner from intsig.com

ॐ किꣳस्विद्वनम्० (सप्तदशाध्यायस्यैको २० मंत्रः) ॥ किꣳस्वित् ॥ किꣳस्विद्वनङ्कऽउसवृक्षऽआसयतोद्यावा पृथिवीनिष्टतक्षुः ॥ मनीषिणोमनसापृच्छतेदुतद्यद्ध्रुवेधर्तिष्ठद्भुवनानिधारयन् ॥ २० ॥

ॐ यादिव्या० ॥ ॐ विष्णोर्न्नुकम् (पञ्चमाध्यायस्य ४ मंत्राः) ॥ विष्णोर्न्नु । कꣳह्यरुर्व्वाणिप्रवोचँय्यः पार्थिवानिविममे रजाꣳसि ॥ योऽअस्कभायदुत्तरꣳसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णवेत्त्वा ॥ १८ ॥ दिवोवा । विष्णऽउत वा पृथिव्यामहोवाविष्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ता वसुनापृणस्वाप्रयच्छदक्षिणादोतसव्याद्विष्णवेत्त्वा ॥१९॥ प्रतत् ॥ प्रतद्विष्णु स्तवते वीर्य्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा ॥ २० ॥ विष्णोरराटम् ॥ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्त्वा ॥२१॥

ॐ अग्निर्म्मूर्द्धा० (त्रयोदशाध्यायस्यैको १४ मन्त्रः) ॥ अग्निर्म्मूर्द्धा । दिवःककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ इन्द्रस्यत्वौजसासादयामि ॥ १४ ॥

ॐ अन्विदनुमते० (चतुस्त्रिंशदध्यायस्यैको ८ मन्त्रः ॥ अन्वित् ॥ अन्विदनुमतेत्वम्मन्यासैशञ्चनस्कृधि ॥ क्रत्वे दक्षायनोहिनुष्प्रणऽआयूꣳषितारिषत् ॥ ८ ॥

Generated by CamScanner from intsig.com

ॐ अन्व॒ग्निरु॒षसा॑० (एकादशाध्यायस्यैको १७ मंत्रः)॥ अन्व॒ग्निः ॥ अन्व॒ग्निरु॒षसा॒मग्र॑मक्ख्यदन्वहा॑नि॒प्रथ॒मो जा॒तवे॑दाः ॥ अनु॒सूर्य॑स्यपुरु॒त्राच॑र॒रश्मी॑ननु॒द्यावा॑पृथि॒वीऽ आत॑तन्थ ॥ १७ ॥

ॐ मम॑ाग्ने॒र्व॑र्चो॑विहव॒ष्वे॑स्तु॒वय॑न्त्वे॒न्धो॑नास्त॒न्वं॑पुषेम ॥ मह्य॑नमन्तां प्र॒दिश॑श्चत॑स्रस्त्वया॒ध्य॑क्षेणपृत॑नाजयेम ऋ. ८,७ १५ ॐ प्र॒जाप॑तयेत्त्वा० (द्वाविंशत्यध्यायस्यैको ५ मंत्रः) ॥ प्र॒जाप॑तयेत्त्वा ॥ प्र॒जाप॑तयेत्त्वाजु॒ष्टम्प्रो॑क्षा॒मीन्द्रा॒ग्निभ्या॑न्त्वाजु॒ष्टम्प्रो॑क्षा॒मिव्वा॑यवेत्त्वाजु॒ष्टम्प्रो॑क्षा॒मि॒ विश्वे॑भ्यस्त्वादे॒वेभ्यो॒जुष्टम्प्रोक्षा॒मि॒सर्वे॑भ्यस्त्वादे॒वे॒भ्यो॒जुष्टम्प्रोक्षा॒मि ॥ योऽअ॒र्वन्त॒ञ्जिघा॑ꣳसति॒तम॒भ्यू॒मी॒ति॒वरु॑णः ॥ प॒रोम॑र्त्तं॒ऽपर॒ऽश्वा ॥ ५ ॥

ॐ काय॒स्वाहा॒० (द्वाविंशत्यध्यायस्यैको २० मंत्रः) ॥ काय॒स्वाहा॑ ॥ काय॒स्वाहा॒कस्म्मै॒स्वाहा॑क॒तम॒स्म्मै॒स्वाहा॒स्वाहा॒धिमा॑धी॒ताय॒स्वाहा॒मन॑ꣳप्र॒जाप॑तये॒स्वाहा॑चि॒त्तंवि॒ज्ञा॒ताया॑दि॑त्यै॒स्वाहा॑दि॑त्यै॒म॒ह्यै॒स्वाहा॑दि॑त्यै॒सुमृ॑डीकाय॒स्वाहा॒सर॑स्व॒त्यै॒स्वाहा॒सर॑स्वत्यै॒पाव॒काय॒स्वाहा॒सर॑स्वत्यै॒बृह॒त्यै॒स्वाहा॑पू॒ष्णेप्र॑प॒थ्या॑य॒स्वाहा॑पूष्णेन॒रान्धि॑षाय॒स्वाहा॒त्वष्ट्रे॒स्वाहा॒त्वष्ट्रे॒तु॒रीपा॑य॒स्वाहा॒त्वष्ट्रे॒पुरु॒रूपा॑य॒स्वाहा॒विष्णो॑वे॒स्वाहा॒विष्णो॑वे॒निभू॑य॒पाय॒स्वाहा॒विष्णो॑वे॒शिपि॑वि॒ष्टाय॒स्वाहा॑ ॥ २० ॥

Generated by CamScanner from intsig.com

ॐ वसवस्त्वाञ्जन्तु० (त्रयोविंशाध्यायस्यैको ८ मन्त्रः)॥ वसवस्त्वा । अन्तुगायत्रेण च्छन्दसारुद्रास्त्वाञ्जन्तुत्रैष्टुभेन च्छन्दसादित्यास्त्वाञ्जन्तुजागतेन च्छन्दसा ॥ भूर्भुवꣳस्वर्लाजी३॥ ऊछाची३॥ न्यङ्ग्येगव्यंऽएतदन्नमत्तदेवाऽएतदन्नमद्धिप्रजापते ॥ ८ ॥

ॐ प्राणायस्वाहा० (द्वाविंशत्यध्यायस्यैको २३ मन्त्रः)॥ प्राणायस्वाहा ॥ पानायस्वहाव्यानायस्वाहुाचक्षुषेस्वाहुा श्रोत्रायस्वाहावाचेस्वाहुामनसेस्वाहा ॥ २३ ॥

ॐ माताचमे० (त्रयोविंशत्यध्यायस्यको २४ मंत्रः)॥ माताच । तेपिताचतेग्ग्रेवृक्षस्यरोहतꣳ ॥ प्रतिलामीतितेपितागभेमुष्टिमतꣳसयत् ॥ २४ ॥

ॐगायत्री त्रिष्टुप्०॥ (त्रयोविंशत्यध्यायस्य ३३ मंत्रः)॥ गायत्रीत्रिष्टुप् ॥ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिःशम्यन्तुत्वा ॥ २३ ॥

ॐ दधिक्राव्णꣳ० इति (त्रयोविंशत्यध्यायस्यैको ३१ मंत्रः) ॥ ॐ आपोहिष्ठामयो० (एकादशाध्यायस्य त्रयो ५१-५२-५३ मंत्राः)॥ ॐ पुनन्तुमा० (एकोनविंशत्यध्यायस्य नव ९ मंत्राः)॥ पुनन्तुमा । देवजनाःपुनन्तुमनसाधियः॥ पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा॥३९॥ पवित्रेणपुनीहि । माशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वा

Generated by CamScanner from intsig.com

क्रतूँ१ ॥ ऽरनु ॥ ४० ॥ यत्ते । पवित्रमर्चिष्यग्नेवितत-
तमन्तरा ॥ ब्रह्मतेनपुनातुमा ॥ ४१ ॥ पवमानःसः ॥
पवमानःसोऽअद्यनः पवित्रेणविचर्षणिः ॥ यःपोतास
पुनातुमा ॥ ४२ ॥ उभाभ्यान्देव । सवितःपवित्रेणसवे-
नच ॥ माम्पुनीहिविश्वतः ॥ ४३ ॥ वैश्वदेवीपुनती ।
देव्यागाद्यस्यामिमाबह्वयस्तन्वोवीतपृष्ठाः ॥ तयामदन्तः
सधमादेषुवयꣳस्यामपतयोरयीणाम् ॥ ४४ ॥ येसमानाः ।
समनसःपितरोयमराज्ये ॥ तेषाँलोकःस्वधानमोयज्ञोदेवेषु
कल्पताम् ॥ ४५ ॥ येसमानाः । समनसोजीवाजीवेषु
मामकाः ॥ तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳ
समाः ॥ ४६ ॥ द्वेसृती ॥ द्वेसृतीऽअशृणवम्पितॄणामह-
न्देवानामुतमर्त्यानाम् ॥ ताभ्यामिदंविश्वमेजत्समेति
यदन्तरापितरंम्मातरञ्च ॥ ४७ ॥ इदꣳहविः ॥ इदꣳहविः
प्रजननम्मेऽअस्तुदशवीरꣳसर्वगणꣳस्वस्तये ॥ आत्कम-
सनिप्रजासनिपशुसनिलोकसन्यंभयसनि ॥ अग्निःप्रजा-
म्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्मासुधत्त ॥ ४८ ॥
उदीरताम् ॥ उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरः
सोम्यासः ॥ असुꣳयऽईयुरबृकाऽऋतज्ञास्तेनोवन्तुपित-
रोहवेषु ॥ ४९ ॥

ॐ यद्देवादेवहेडनन्० (विंशत्यध्यायस्य त्रयो मंत्राः)

Generated by CamScanner from intsig.com

यदेवाः ॥ यदैवादेवहेडनन्देवासश्चकृमाव्वयम् । अग्निर्म्मात स्म्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ १४ ॥ यदिदिवा ॥ यदिदिवायदिनक्तमेनाꣳसिचकृमाव्वयम् ॥ व्वायुर्म्मात-स्म्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ १५ ॥ यदिजाग्रत् ॥ यदिजाग्रद्यदिस्वप्नऽएनाꣳसिचकृमाव्वयम् ॥ सूऽर्य्योमा तस्म्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ १६ ॥

ॐ शिरोमे० (विंशत्यध्यायस्य चत्वारो ४ मन्त्राः) ॥ शिरोमे ॥ शिरोमेश्श्रीर्य्यशोमुखन्त्विषिःकेशाश्चश्मश्रूणि ॥ राजामेप्राणोऽअमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रम् ॥ ५ ॥ जिह्वामे । भद्रंवाङ्म्महोमनोमन्युश्स्वराड्भामः ॥ मोदाः प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ॥ ६ ॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मवीर्य्यम् ॥ आत्क्माक्षत्र-मुरोमम ॥७॥ पृष्टीर्म्मे ॥ राष्ट्रमुदरमꣳसौग्रीवाश्चश्रोणी । ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्व्वतः ॥ ८ ॥

ॐ देवस्यत्त्वा० सरस्वत्यै० म्यसौ (नवमाध्यायस्यैको ३० मंत्रः) ॥ ॐ देवस्यत्त्वा० सरस्वत्यै० षिञ्चामि ॥ (अष्टादशध्यायस्यैको ३७ मंत्रः) ॥ ॐ देवस्यत्त्वा० अश्विनो० (विंशत्यध्यायस्यैको ३ मंत्रः) ॥

ॐदेवंदेवंव्वोऽवसे० (त्रयस्त्रिंशदध्यायस्यैको ९१ मंत्रः) देवन्देवंवꣳ ॥ देवन्देवंव्वोऽवसेदेवन्देवमभिष्टये ॥ देवन्देवꣳ हुवेमव्वाजसातयेगृणन्तोदेव्याधिया ॥ ९१ ॥

ॐ अग्निर्देवता० (चतुर्दशाध्यायस्यैको २० मंत्रः) ॥
ॐ यज्ञायज्ञावो० (सप्तविंशाध्यायस्यैको ४ मंत्रः) ॥
यज्ञायज्ञावः ॥ यज्ञायज्ञावोऽअग्नयेगिराचदक्षसे ॥
प्रप्रवयममृतंजातवेदसम्प्रियम्मित्रन्नशंसिषम् ॥ ४२ ॥
पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्युतद्वितीयया ॥
पाहिगीर्भिस्तिसृभिरूर्ज्जाम्पतेपाहिचतसृभिर्वसो ॥४३॥
ऊर्ज्जोनपातम् ॥ ऊर्ज्जोनपातꣳसहिनायमस्म्मयुर्दाशेमहव्यदातये ॥ भुवद्वाजेष्वविताभुवद्वृधऽउतत्रातातनूनाम् ॥४४॥
संवत्सरोसि । परिवत्सरोसीदावत्सरोसीद्वत्सरोसिवत्सरोसि ॥ उषसस्तेकल्पन्तामहोरात्रास्तेकल्पन्तामर्द्धमासास्तेकल्पन्ताम्मासास्तेकल्पन्तामृतवस्तेकल्पन्ताꣳसंवत्सरस्तेकल्पताम् ॥ प्रेत्याऽऽएत्यैसञ्चाञ्चप्रचसारय ॥ सुपर्णचिदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद ॥ ४५ ॥

ततो दशदिक्पालमंत्राः ॥ नवग्रहदेवतानामधिदेवताप्रत्यधिदेवतासहिता नवग्रहमण्डलदेवतामन्त्राः ॥

ॐ सहस्त्तोमाः (चतुस्त्रिंशदध्यायस्यैको ४९ मंत्रः) ॥
ॐ वाजश्च० इति (अष्टादशाध्यायस्य २९ मंत्राः) ॥
ॐ स्वाहाप्प्राणेभ्यः० (एकोनचत्वारिंशदध्यायः सम्पूर्णः १३ मन्त्राः) ॥ स्वाहाप्प्राणेभ्यः ॥ स्वाहाप्प्राणेभ्यःसाधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहावायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा ॥१॥

Generated by CamScanner from intsig.com

द्विग्भ्यः स्वाहा । चन्द्रायस्वाहानक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहावरुणायस्वाहा ॥ नाभ्यैस्वाहापूतायस्वाहा ॥ २ ॥ वाचेस्वाहा । प्राणायस्वाहाप्राणायस्वाहा ॥ चक्षुषेस्वाहा चक्षुषेस्वाहाश्रोत्रायस्वाहाश्रोत्रायस्वाहा ॥ ३ ॥ मनसः कामम् ॥ मनसः काममाकूतिंवाचः सत्यमंशीय ॥ पशूनाꣳ रूपमन्नस्यरसोयशः श्रीः श्रयतान्मयिस्वाहा ॥४॥ प्रजापतिः सम्भ्रियमाणः । सम्राट्सम्भृतोवैश्वदेवः सदः सन्नोघर्म्मः प्रवृक्तस्तेजऽउद्यतऽआश्विनः पर्यस्यानीयमानेपौष्णोविष्यन्दमानेमारुतः क्लृप्तः ॥ मैत्रः शरसिसन्ताय्यमानेवायव्योहियमाणऽआग्नेयोहूयमानोवाग्घुतः ॥ ५ ॥ सविताप्रथमे । हन्नग्निर्द्वितीयेवायुस्तृतीयऽआदित्यश्चतुर्थेचन्द्रमाः पञ्चमऽऋतुः षष्ठमरुतः सप्तमेबृहस्पतिरष्टमे ॥ मित्रोनवमेवरुणोदशमऽइन्द्रऽएकादशेविश्वेदेवाद्वादशे ॥ ॥ ६ ॥ अत्रास्याध्यायस्यावसिष्ठाः "उग्रश्चे०" इत्यारभ्य युमायस्वाहा० इत्यन्ताः सर्वे मंत्रा उच्चारणीयाः ॥

ॐ ऋचं वाचम्० (षट्त्रिंशदध्यायः सम्पूर्णः २४ मंत्राः)

उत्तरपूजनम्– अनन्तरं पुनर्गणपतेर्ब्रह्मणश्चोत्तरपूजनं कृत्वा महानैवेद्यं विधाय आरार्तिक्यं मन्त्रपुष्पाञ्जलिपर्यन्तं सर्वं समापयेत् ॥

अथाभिषेकः– ततश्चाचार्यः अभिषेककर्मणि नूतनानि वस्त्राणि धृत्वाऽऽगतं सपत्नीकं पुत्रपौत्रादियुक्तं यजमानं पीठे

Generated by CamScanner from intsig.com

उपवेश्य पत्नीं तस्य वामभागे चोपवेशयित्वा एकस्मिन्पात्रे ब्रह्मकलशाज्जलं प्रणवोच्चारपूर्वकं चतुर्थांशं गृह्णीयात् । तत-श्चोदकशान्तिकर्मणि वृताः सर्वे ब्राह्मणा उदङ्मुखास्तिष्ठन्तः सपत्नीकं यजमानमभिषिञ्चेयुः ॥

आदौ तीर्थग्रहणम्– आचार्यो ब्रह्मणः कलशाज्जलं गृहीत्वा सपत्नीकाय यजमानाय सर्वेभ्यो ब्राह्मणेभ्यश्च आचमनं दद्यात् ॥

अथाभिषेकः–सव्याहृति ॐ आपोहिष्ठामयो० त्रिभि-र्मन्त्रैः॥ ॐइमम्मे० ॐतत्त्वायामि० । ॐत्वन्नोऽअग्ने० । ॐ सत्त्वन्नोऽअग्ने० । ॐ उदुत्तमंव० इति पञ्चभिः ॥ ॐ भगप्प्रणे० ॥ ॐ इदमापः० ॥ समुद्रायत्त्वा० । पुनन्तुमा० ॐआप्यायस्व० ॥ ॐपञ्चनद्यः० । ॐशिरोमे० ॐ जिह्वामे० । ॐ ब्राहूमे० । ॐ पृष्ठीर्म्मे० चतुर्भि-र्मन्त्रैः ॥ ॐ देवस्यत्त्वा० इति त्रिभिर्मन्त्रैः ॥ ॐ सुरा-स्त्वा० इति पौराणिकैर्मन्त्रैश्चाभिषेकं कुर्युः ॥

अभिषेकानन्तरं स्नानम्– यजमानः पुनस्तिलामलक-द्रव्यैरुद्वर्त्तनं कृत्वा ब्रह्मकलशाच्चतुर्थांशं जलं स्नानजले निक्षिप्योष्णोदकेन स्नानं कृत्वा स्नानवस्त्राणि परित्यज्य नूतने वस्त्रोपवस्त्रे धृत्वा मण्डपमागत्य पत्न्या सहोपविशेत् ॥

यजमानभाले तिलकम्– आचार्यः सपत्नीकस्य यजमा-नस्य भाले ॐ स्वस्तिनः० । इति तिलकं कुर्यात् ॥

Generated by CamScanner from intsig.com

श्रेयोदानम्–यजमानहस्ते 'शिवा आपः सन्तु०' इत्यादि दत्त्वा 'यत्पापमरोगं तद्दूरे प्रतिहतमस्तु' इति वदेत् ॥ आचार्यः स्वदक्षिणहस्ते जलेन सह नारिकेलसहितानि पञ्च सप्त फलानि वा गृहीत्वा वदेत्-मया अस्मिन्नुदकशान्ति-कर्मणि यत्कृतम् आचार्यत्वं तथा च पूर्वादिदिक्षुवृतैरेभि-र्ब्राह्मणैश्च यत्कृतं वेदमंत्राणां जपश्च तदुत्पन्नं श्रेयः एभिः फलैर्जलेन सह तुभ्यमहं सम्प्रददे ॥ इति यजमानस्य पत्न्याश्च हस्ते जलं दद्यात् ॥ तौ च तज्जलं प्राशये ताम् ॥ हस्तप्रक्षालनानन्तरं यजमानस्याञ्जलौ फलानि दद्यात् ॥ यजमानश्च तानि फलानि स्वपत्न्या वस्त्राञ्जलौ दद्यात् ॥

दक्षिणादानम्–अद्येत्यादि० शुभपुण्यतिथौ मया ममा मुककामनापरिपूर्तये ब्राह्मणद्वारा आचरितस्य उदकशान्ति-कर्मणः साङ्गतासिद्धये अद्येऽहि यथासङ्ख्याकान् ब्राह्मणा-न्भोजयिष्यामि । पुनर्जलं गृहीत्वा । कृतस्योदकशान्ति-कर्मणः साद्गुण्यार्थं वृतानां ब्राह्मणानां यथाशक्ति दक्षिणा-प्रदानं करिष्ये ॥ इति सङ्कल्पं कृत्वा दक्षिणां दद्यात् ॥

आशीर्वादः–सपत्नीकयजमानस्य भाले तिलकं कृत्वा आचार्यादयः सर्वे ऋत्विज आशीर्वादार्थं ॐ पुनस्त्वा०

---

१ आचार्याय सुवर्णम्–पूर्वदिशि वृतस्य सुवर्णम् । दक्षिणदिशि वृतस्य रजतम् । पश्चिमदिशि वृतस्य कांस्यम् । उत्तरदिशि वृतस्य कौशेयं वस्त्रम् । तदतिरिक्तानां सर्वेषां ब्राह्मणानां सुवर्णादिदक्षिणां दद्यात् ॥

Generated by CamScanner from intsig.com

यथेमांवाचम्० । शतमिन्दु० मंत्रान् पठेयुः ॥ यजमानश्च नमस्कारं कुर्यात् ॥ तत्र मंत्राः– ॐ तेषां वाऽ उभयतो नमस्काराऽ अन्येऽन्यतरतो नमस्कारा अन्यतेहतेऽघोरत-राऽअशान्ततरा षऽउभयतो नमस्कारा उभयतऽ एवैनानेन तद्यज्ञेन नमस्कारेण शमयति ॥

यजमानो वदेत्– जपच्छिद्रं तपच्छिद्रं यच्छिद्रं शान्ति-कर्मणि । सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ॥ अबुद्ध-मतिरिक्तं वा द्रव्यहीनं मया कृतम् ॥ तत्सर्वं पूर्णतां यातु वेदब्रह्मन्नमोऽस्तु ते ॥ 'तथास्तु' इति ब्राह्मणा वदेयुः ॥

विसर्जनम्– यजमानो हस्ते अक्षतान् गृहीत्वा ॐ उत्तिष्ठब्रह्मण० इति मंत्रं पठित्वा स्थापितानां देवानामुपरि अक्षतान् दत्त्वा विसर्जनं कुर्यात् ॥ तत आचार्यो ब्रह्मणः पञ्चामृतं मध्यकलशोदकं तेषां प्रसादमपि च दद्यात् ॥

विष्णुस्मरणम्– यस्य स्मृत्या० इति पठित्वा नमस्कारं कुर्यात् ॥

इति "महर्षिकात्यायनोक्तः शुक्लयजुर्वेदशाखीय उदकशान्तिप्रयोगः"
[illegible]मनगरनिवासिना आचार्योपाह्वेन अमृतलालत्रिकमजीशास्त्रिणा
संकलितः समाप्तः ॥

Generated by CamScanner from intsig.com